# .. bhUtAdhipastotram ..

## ॥ भूताधिपस्तोत्रम् ॥

भूताधिपं भजे भूताधिपं - दिव्य
भूताधिपं भजे भूताधिपम् ॥ १
देवारिमर्दनं भूताधिपं भू-
तगणसुवन्दितं भूताधिपम् ॥ २
देवेन्द्रवन्दितं भूताधिपं - भक्त-
वृन्दबहुस्तुतं भूताधिपम् ॥ ३
कारुण्य वीक्षणं भूताधिपं - श्री-
गजमुखसोदरं भूताधिपम् ॥ ४
श्रीकुण्डलाञ्चितं भूताधिपं श्री-
मणिकण्ठभासुरं भूताधिपम् ॥ ५
नाळीकलोचनं भूताधिपं श्री-
कालाम्बुदश्याळं भूताधिपम् ॥ ६
नानार्थ दायकं भूताधिपं कलि-
दोषदावानलं भूताधिपम् ॥ ७
दीनार्ति भञ्जनं भूताधिपं सु-
भक्तजनतारकं भूताधिपम् ॥ ८
पाण्ड्येशसेवकं भूताधिपं पाण्ड्य-
वंशसुरक्षितं भूताधिपम् ॥ ९
क्लेशपाशक्षतिं भूताधिपं क्लिष्ट-
जनरक्षकं भूताधिपम् ॥ १०
संसारतारकं भूताधिपं शत्रु-
कुलध्वंसकं भूताधिपम् ॥ ११
पुण्यलोकाश्रयं भूताधिपं पुण्य-
जनपूजितं भूताधिपम् ॥ १२
आश्रितवत्सलं भूताधिपं विश्व-
विशृतविग्रहं भूताधिपम् ॥ १३
कल्याणदायकं भूताधिपं सु-
कीर्तन सक्त चित्तं भूताधिपम् ॥ १४
किरातवपुषं भूताधिपं मृग-
यावनस्थितं भूताधिपम् ॥ १५
अज्ञाननाशनं भूताधिपं सु-
विज्ञानदायकं भूताधिपम् ॥ १६

अद्भुतविग्रहं भूताधिपं अणि-
मादिसिद्धिदं भूताधिपम् ॥ १७
समस्तैकनाथं भूताधिपं ताप-
त्रयशान्तिदं भूताधिपम् ॥ १८
भूताधिप स्तोत्रं समाप्तम् ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org